শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী শ্রীনিৱাসমহাদেশিক (আক্কূর্ আণ্ডৱন্) মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী শ্রীনিৱাসমহাদেশিক (আক্কূর্ আণ্ডৱন্) মঙ্গলম্ ॥

জ্ঞানভক্তিৱিরক্ত্যাদি কল্যাণগুণশেৱধিঃ।
শ্রীনিৱাসযতীন্দ্রো মে সন্নিধত্তাং সদা হৃদি॥ 1 ॥

ৱেদান্তলক্ষণমুনেঃ প্রাপ্তৱেদান্তসম্পদে।
শ্রীনিৱাসমুনীন্দ্রায দেশিকাযাস্তু মঙ্গলম্॥ 2 ॥

রহস্যত্রযভাষ্যাদিগ্রন্থসারার্থৱেদিনে।
হেমাব্জসমনেত্রায যতিৱর্যায মঙ্গলম্॥ 3 ॥

দুর্ৱাদিগজসিংহায প্রপন্নজনবন্ধৱে।
সর্ৱতন্ত্রস্ৱতন্ত্রায সর্ৱজ্ঞাযাস্তু মঙ্গলম্॥ 4 ॥

শ্রীমুনিত্রযসিদ্ধান্তস্থাপকায মহাত্মনে।
শুচযে সাধুসেৱ্যায গুরুমুখ্যায মঙ্গলম্॥ 5 ॥

কন্যামাস্যুত্তরপ্রোষ্ঠপদোডুনি শুভান্ৱিতে।
ৱিক্রমে রত্নগর্ভাযামৱতীর্ণায মঙ্গলম্॥ 6 ॥

জ্ঞানৱারিধিৱেদান্তলক্ষণাহ্ৱযযোগিনা।
হস্ত্যদ্রীশপদাম্ভোজে ন্যস্তভারায মঙ্গলম্॥ 7 ॥

জ্ঞানানুষ্ঠানৱৈরাগ্যশান্তিদান্তিদযাব্ধযে।
জ্ঞানপ্রদাত্রে ছাত্রাণাং নির্মমাযাস্তু মঙ্গলম্॥ 8 ॥

সংসারসাগরে মগ্নান্দীনানুদ্ধর্তুমিচ্ছতে।
অৱতীর্যোত্তারযতে মুক্তিদাযাস্তু মঙ্গলম্॥ **9**॥

লসত্ত্রিদণ্দহস্তায সূর্ধ্ৱপুণ্ড্রৱিশোভিনে।
সিতযজ্ঞোপৱীতায গুরৱে ভূরি মঙ্গলম্॥ **10**॥

ভগৱচ্চরণাংভোজমানসায জিতাত্মনে।
প্রত্যহং ষড্গুরূপানৎপূজকাযাস্তু মঙ্গলম্॥ **11**॥

রঙ্গাদিক্ষেত্রভগৱৎসেৱাসন্তুষ্টচেতসে।
আর্তাশ্রিতজনত্রাণদীক্ষিতাযাস্তু মঙ্গলম্॥ **12**॥

যস্যানুগ্রহলেশেন মন্দোপি প্রাজ্ঞতামিযাৎ।
তস্মৈ শ্রী শ্রীনিৱাসাখ্য দেশিকেন্দ্রায মঙ্গলম্॥ **13**॥

তদ্দেশিককটাক্ষেণ রচিতং গুরুমঙ্গলম্।
যঃ পঠেচ্ছ্রদ্ধযা সোঽপি ভৱেন্মঙ্গলভাজনম্॥ **14**॥

ৱেদান্তরামানুজসংযমীন্দ্রো
    নতার্তিহা যস্য গুরূত্তমোঽভূৎ।
শ্রীপাদুকাসেৱকলক্ষ্মণাখ্যঃ
    প্রাচার্য আসীৎস চিরায জীযাৎ॥ **15**॥

॥ ইতি শ্রী শ্রীনিৱাসমহাদেশিক মঙ্গলং সমাপ্তম্॥